श्री राम द्वादशनाम स्तोत्रं

श्री राम द्वादशनाम स्तोत्रं

प्रथमं श्रीधरं विद्याद्द्वितीयं रघुनायकं |
तृतीयं रामचंद्रं च चतुर्थं रावणांतकं || 1 ||

पंचमं लोकपूज्यं च षष्ठमं जानकीपतिं |
सप्तमं वासुदेवं च श्रीरामं चाऽष्टमं तथा || 2 ||

नवमं जलदश्यामं दशमं लक्ष्मणाग्रजं |
एकादशं च गोविंदं द्वादशं सेतुबंधनं || 3 ||

द्वादशैतानि नामानि यः पठेच्छ्रद्धयान्वितः |
अर्धरात्रे तु द्वादश्यां कुष्ठदारिद्र्यनाशनं || 4 ||

अरण्ये चैव संग्रामे अग्नौ भयनिवारणं |
ब्रह्महत्या सुरापानं गोहत्यादि निवारणं || 5 ||

सप्तवारं पठेन्नित्यं सर्वारिष्टनिवारणं |
ग्रहणे च जले स्थित्वा नदीतीरे विशेषतः |
अश्वमेधशतं पुण्यं ब्रह्मलोकं गमिष्यति || 6 ||

इति श्री स्कांदपुराणे उत्तरखंडे श्री उमामहेश्वरसंवादे श्री राम द्वादशनामस्तोत्रं |